दैनिकं ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ताः
हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः
himsanskritvartah
e-Sanskritnewspaper
नवा प्रेरणा नवोत्साहः
■ पृष्ठ-4 ■ वर्ष-3 ■ अङ्क-234
1
17.06.2024 सोमवासरः वि.सं. २०८० ज्येष्ठशुक्लदशमी आषाढः 4 प्रविष्टांशः
Website- www.himsanskritam.com Email-himsanskrit@gmail.com

## त्रिंशत्दिनाङ्के "मन की बात" इति कार्यक्रमे प्रधानमन्त्री देशवासिभिः साकं विचार-विनिमयं करिष्यति

**हिमसंस्कृतवार्ताः।** प्रधानमन्त्री नरेन्द्रमोदी आकाशवाण्याः "मन की बात" इति कार्यक्रमे अस्य मासस्य त्रिंशत्दिनाङ्के देशवासिभिः साकं विचार-विनिमयं करिष्यति। "मन की बात" इति मासिक-कार्यक्रमस्य इदं एकादशाधिकैक-संस्करणं भविता। अस्य कार्यक्रमस्य प्रसारणं आकाशवाण्याः दूरदर्शनस्य च सर्वाभिः वाहिनिभिः प्रसारयिष्यते। अयं कार्यक्रमः आकाशवाणी-दूरदर्शन-प्रधानमन्त्री-कार्यालय-सूचनाप्रसारणमन्त्रालय-इत्येतेषां यूट्यूब-वाहिनीष्वपि द्रष्टुं शक्यते इति। प्रधानमन्त्रिणः सम्बोधनानन्तरं अनुक्षणं अयं कार्यक्रमः क्षेत्रीय-भाषाष्वपि श्रोतुं शक्यते। जनाः निजविचारान् परामर्शान् च निःशुल्क दूरभाषसंख्यायाम् 1800-11-7800 इत्यत्र प्रेषितुम् शक्नुवन्ति।

## राज्यसभायाः सभापतिः जगदीपधनखडः संसद् भवन परिसरे नव-निर्मितस्य प्रेरणा-स्थलस्य उद्घाटनं कृतवान



**हिमसंस्कृतवार्ताः।** उपराष्ट्रपतिः राज्यसभायाः सभापतिः जगदीपधनखडः संसद् भवन परिसरे नव- निर्मितस्य प्रेरणा-स्थलस्य उद्घाटनं कृतवान्। कार्यक्रमाय लोकसभायाः राज्यसभायाः सर्वे सदस्याः आमन्त्रिताः आसन्। प्रेरणास्थलस्य निर्माणं संसद् भवन' परिसरे महतां नेतृणां स्वाधीन-संग्रामिणां च एकस्मिन् एव स्थाने श्रद्धांजलिं अर्पयितुम् कृतम्।

## वन्देभारत-शयनयानश्रेण्याः सततं अभ्यर्थनं संवर्धति- रेलमन्त्री अश्विनी वैष्णवः



हिमसंस्कृतवार्ताः।वन्देभारत-रेलयानस्य शयनयानश्रेण्याः परीक्षणं आगामिनि मासद्वये समारप्स्यते। वर्तमानसमये रेलविभागेन वन्देभारत-एक्सप्रेसयानं प्रचाल्यते यस्मिन् केवलम् आसन्दाः एव स्थापिताः सन्ति। रेलमन्त्री अश्विनी वैष्णवः प्रोक्तवान् यत् वन्देभारत-शयनयानश्रेण्याः सततं अभ्यर्थनं संवर्धति। अवधेयं वर्तते यत् वन्देभारतरेलयानं स्वदेशेनिर्मितं प्रथमं अर्द्धाच्चगतियुतं रेलयानं वर्तते। मन्त्रिणा निगदितं यत् आगामिषु पञ्चवर्षेषु प्रशासनं रेलगत-आधारभूत सरञ्चनानां विकासार्थं यात्रिभ्यः सौविध्यप्रदानाय प्रतिबद्धं भविष्यति।

## नूतनसर्वकारस्य शतदिवसीय-योजनायाः अन्तर्गतं कृषिमन्त्रालयस्य कार्ययोजनायाः कृता समीक्षा



**हिमसंस्कृतवार्ताः।** केन्द्रीय-कृषिमन्त्री शिवराजसिंहचौहानः प्रोदीरितवान् यत् प्रधानमन्त्री नरेन्द्रमोदी जूनमासस्य अष्टादश दिनांके किसान-सम्मान-निधि-योजनायाः अन्तर्गतं त्रिलक्षाधिक- नवकोटि-कृषकाणां वित्तकोषे भूयोऽपि विंशति सहस्रकोटिरूप्यकाणि हस्तान्तरितं करिष्यति। नवदिल्ल्यां श्रीचौहानः अकथयत् यत् व्यतीतेषु दशसु वर्षेषु साम्प्रतं यावत् एकादशकोटि- कृषकाणां वित्तकोषेषु त्रि-लक्ष-कोटि-रूप्यकाणि सम्प्रेषितानि। असौ जूनमासस्य अष्टादशदिनांके प्रधानमन्त्रिणः कार्यक्रमेऽस्मिन् सम्मिलितुं सर्वेभ्य मुख्यमन्त्रिभ्यः पत्र लिखितवान्। सः प्रकाशितवान् यत् असौ ग्रामीणविकासः कृषिः तथा कृषककल्याणमन्त्रीरूपेण प्रभारं स्वीकृत्य मन्त्रालयस्य अधिकारिभिः सह चर्चा कृत्वा कृषकाणां कल्याणसम्बद्धेषु प्रत्येकस्मिन् महत्त्वपूर्णेषु विषयेषु कार्यं कुर्वन् अस्ति। चौहानमहोदयः अवदत् यत् सः नूतनसर्वकारस्य शतदिवसीययोजनायाः अन्तर्गतं स्वमन्त्रालयस्य कार्ययोजनायाः अपि समीक्षां कृतवान्।

## देशस्य उत्तर-पश्चिमीयभागेषु मध्यवर्तिषु पूर्वीयेषु च भागेषु भीषण- ग्रीष्मस्य नारङ्ग-रक्त-वार्णिकी जनसंचतेना

हिमसंस्कृतवार्ताः। ऋतुविभागेन देशस्य उत्तर-पश्चिमीयभागेषु मध्यवर्तिषु पूर्वीयेषु च भागेषु भीषण- ग्रीष्मस्य नारङ्ग-रक्त-वार्णिकी जनसंचतेना प्रसारिता। उत्तर-प्रदेश-पंजाब-हरियाणा- चंडीगढ-दिल्ली-बिहार-झारखण्ड-प्रदेशानां केषुचित् भागेषु आगामिनं द्विदिवसं यावत् ऊष्णतापस्य, भीषण-ग्रीष्मस्य प्रकोपः भविष्यति। हिमाचल प्रदेश-राजस्थान, मध्यप्रदेश- छत्तीसगढ-उत्तराखण्ड प्रदेशेषु जूनमासस्य अष्टादश दिनाङ्क यावत् ईदृशी स्थितिः भविष्यति।

## जम्मूकश्मीरे सुरक्षास्थिर्ति समीक्षितुं नवदिल्ल्यां एकम् उच्चस्तरीयोपवेशनम्

गृहमंत्री अमितशाहः जम्मूकश्मीरे सुरक्षास्थिर्ति समीक्षितुं नवदिल्ल्यां एकम् उच्चस्तरीयोपवेशनं विहितवान्। एतस्मिन् उपवेशने असौ केन्द्रशासितप्रदेशे अधुनावधौ जातं आतङ्कीयाक्रमणं निधाय सुरक्षास्थिर्ति परिचर्चितवान्। उपवेशने जम्मूकश्मीरस्य उपराज्यपालः मनोजसिन्हाः, राष्ट्रीय-सुरक्षा-परामर्शदः अजीत डोभालः, केंद्रीय-गृह-सचिवः अजयभल्लाः जम्मू-कश्मीर-प्रशासनस्य वरिष्ठ अधिकारिणः च आसन्।

## ये आतंकवादं समर्थयन्ति तैः सह कठोररूपेण व्यवहारः भविष्यति-जम्मू-कश्मीर-उपराज्यपालः

हिमसंस्कृतवार्ताः। जम्मू-कश्मीरस्य उपराज्यपालः मनोजसिन्हाः जम्मू-कश्मीर-राज्ये आतङ्कवादीनां आधारभूतसंरचनानां विनाशार्थं सुरक्षासंस्थाभिः सह समन्वयेन कार्यान्वयनं कर्तुं प्रशासनाय निर्देशं दत्तवान्। तेन प्रोक्तं यत् ये आतंकवादं वर्धापयन्ति समर्थयन्ति वा तैः सह कठोररूपेण व्यवहारः भविष्यति । श्रीनगरनगरे उच्चस्तरीयोपवेशने उपराज्यपालः प्रशासनेन सह श्री अमरनाथयात्रायाः, योगदिवसस्य ईद-उल-अजहा- पर्वणः च सज्जतायाः विषये चर्चा कृतवान्।

## भारतस्य नूतनाः आपराधिक-न्यायिकप्रणाली प्रगतिशीलः पन्थः इति शीर्षकेण कोलकातायां सम्मेलनम्

सर्वकारः आपराधिक-न्यायिक प्रणाल्याः प्रशासने भारतीयः प्रगतिवान् पन्थाः इति शीर्षकेण कोलकातायां सम्मेलनम् आयोजितवान्। केन्द्रीय-विधि-न्याय-मत्री च अर्जुन-राम- मेघवालः सम्मेलनस्य उद्घाटनं कृतवान्। सः उक्तवान् यत् एते त्रयः आपराधिक-विधयः विहिताः। मेघवालः अग्रे प्रोक्तवान् यत् यथास्थितिः यथासमयं च विधिषु परिवर्तनानि आवश्यकानि सन्ति।



## सुभाषितम्

**देयमार्तस्य शयनं**
**स्थितश्रान्तस्य चासनम्।**
**तृषितस्य च पानीयं**
**क्षुधितस्य च भोजनम् ॥**

भावार्थ- मनुष्य को आए हुए को आराम करने की सुविधा देनी चाहिए, थके हुए को बैठने के लिए आसन देना चाहिए, प्यासे को पानी देना चाहिए और भुखे को भोजन देना चाहिए।

*✍ प्रतीकसाठ्ये मुम्बई*

## सामान्यज्ञानम्

**प्र. भारतस्य वर्तमानकृषिमन्त्री कः ?**
**उत्तरम्- श्रीशिवराजसिंहचौहानः**
**प्र. वैष्णोदेवी मन्दिरं कस्मिन् राज्ये अस्ति ?**
**उत्तरम्- जम्मूकश्मीरे**
**प्र. पर्वतानां राज्ञी इति कथ्यते-**
**उत्तरम्- शिमला**
**प्र.कुतुबमीनारः कुत्र वर्तते?**
**उत्तरम्- देहल्याम्**
**प्र. पण्डिता रमाबाई कदा जन्म अलभत?**
**उत्तरम्- २३ एप्रिल १८५८ तमे वर्षे**

शिवानी शर्मा, हिमसंस्कृतवार्ताः

**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**

कार्यालयः
**हिमसंस्कृतम् प्रकाशनम्**
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

## सिक्किमप्रदेशे अत्यवृष्ट्या अनन्तरं युद्धस्तरेण प्रचलति उद्धारकार्यक्रमः



सिक्किमप्रदेशे अत्यधिक-वृष्ट्या भूस्खलनेन च मंगनजनपदस्य लाचुंग चुंगथांग-स्थलयोः अवरुद्धानां द्वादश-शताधिकानां देशीयानां पर्यटकानां पञ्चदश च वैदेशिक-पर्यटकानां निष्कासनकार्यं विधीयते। मंगनजनपदस्य जनपदाधिकारी हेमकुमार-छत्री इत्येषः आकाशवाणीं संसूचितवान् यत् प्रतिकूलऋतोः प्रभावेन अवरुद्धानां जनानां कृते वैमानिकी- सेवापि नैव सम्भाव्यते। अपि च विविधेषु स्थानेषु मार्गसम्पर्काः अवरूद्धाः जाताः। नैरन्तर्येण वृष्ट्याः नवजनाः मृत्युम् उपगताः।

हिमसंस्कृतवार्ताः दैनिकं ई-संस्कृतवार्तापत्रम्
हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः
2 17.06.2024 सोमवासरः वि.सं. २०८० ज्येष्ठशुक्लदशमी आषाढः 4 प्रविष्टांशः
Website- www.himsanskritam.com Email-himsanskrit@gmail.com

# हाटुमन्दिरपर्यन्तं रज्जुमार्गस्य स्थापनायाः सम्भावनानां अन्वेषणं कुर्वन् अस्ति सर्वकारः- मुख्यमन्त्री हिमाचलप्रदेशः



**हिमसंस्कृतवार्ताः - शिमला।**

मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः रविवासरे शिमलामण्डलस्य ठियोग विधानसभाक्षेत्रस्य नारकण्डायाः प्रवासं कृत्वा स्थानीयजनैः सह मिलित्वा जनानां समस्याः श्रुतवान्। क्षेत्रस्य विभिन्नप्रतिनिधिमण्डलेभ्यः तेषां समस्यानां समाधानं भविष्यति इति आश्वासनं दत्तवान्। मुख्यमन्त्री उक्तवान् यत् राज्यस्य इतिहासे प्रथमवारं मण्डी मध्यस्थतायोजनायाः (एम.आई.एस.) अन्तर्गतं सेब-उत्पादकानां सर्वाणि दायित्वं राज्यसर्वकारेण दत्तम्। राज्यसर्वकारेण पूर्वभाजपासर्वकारस्य ९० कोटिरूप्यकाणां ऋणैः सहितं सर्वेषां देयकानां निस्तारणार्थं १५३ कोटिरूप्यकाणि मुक्तानि। सः अवदत् यत् सेबकीटनाशक-उर्वरक-आदिषु कृषकान् मालीभ्यश्च यत् अनुदानं दत्तं तत् पूर्वभाजपा-सर्वकारेण स्थगितम् किन्तु वर्तमान-राज्यसर्वकारेण तत् पुनः स्थापितम्। कृषकाणां कृते अधुना गुणवत्तापूर्णानि उत्पादनानि प्राप्यन्ते। सः अवदत् यत् काङ्ग्रेसराज्यसर्वकारेण सेबस्य समर्थनमूल्ये प्रतिकिलोग्रामे १.५० रूप्यकाणां ऐतिहासिकवृद्धिः कृता, येन सेबस्य समर्थनमूल्यं अधुना प्रतिकिलोग्रामं १२ रुप्यकाणि जातम्। गतवर्षे राज्यसर्वकारेण प्रतिकिलोग्रामाधारेण सेबविक्रयणं सुनिश्चितं कृतम् आसीत्, अस्मिन् वर्षे च सार्वभौमिकं कार्टूनव्यवस्था कार्यान्विता भवति। मुख्यमन्त्री उक्तवान् यत् गतवर्षे वर्षर्तौ राज्यसर्वकारेण पंचायतानां कृते क्षतिग्रस्तमार्गाणां पुनर्स्थापनार्थं पर्याप्तं धनं प्रदत्तम्। कृषकान् आर्थिकहानितः रक्षितुं राज्यसर्वकारेण सेबं मण्डीपर्यन्तं परिवहनस्य सुविधा प्रदत्ता। मुख्यमन्त्री उक्तवान् यत् राज्यसर्वकारेण इन्दिरागान्धी-प्रियभगिनी- सुख-सम्माननिधियोजनायाः अन्तर्गतं नारकण्डाक्षेत्रस्य १७३ लाभार्थीमहिलानां वित्तकोषसंख्यासु त्रयमासानां कृते सम्माननिधिरूपेण ४५०० रूप्यकाणि स्थानान्तरितानि सन्ति तथा च अवशिष्टानाम् आवेदनानां समीक्षा क्रियते सः अवदत् यत् अस्याः योजनायाः अन्तर्गतं शिमलामण्डले २५६९ महिलाभ्यः प्रतिमहिलायां ४५०० रुप्यकाणि प्रदत्तानि सन्ति, येषु आहत्य १.१५ कोटिरूप्यकाणि व्ययितानि सन्ति। पत्रकारैः सह वार्तालापं कुर्वन् मुख्यमन्त्री अवदत् यत् शिमलामण्डलस्य उपरितनक्षेत्रेषु पर्यटनस्य अपारसंभावना वर्तते तथा च राज्यसर्वकारः पर्यटनक्रियाकलापानाम् प्रचारार्थं सर्वप्रयत्नाः कुर्वन् अस्ति। सः अवदत् यत् राज्यसर्वकारेण नारकण्डायां आइसस्केटिङ्ग-क्रीडाङ्गणस्य स्थापनायै ५ कोटिरूप्यकाणि विनियोजितानि सन्ति, अत्र बहु-उद्देश्यीयक्रीडाभवनस्य निर्माणमपि भविष्यति। सः अवदत् यत् ढलीतः नारकण्डामार्गं यावत् चतुर्लेनराजमार्गरूपेण उन्नयनं कृत्वा यात्रिकाणां सुविधायै कन्दरासुविधाः प्रदातुं प्रयत्नाः क्रियन्ते। मुख्यमन्त्री उक्तवान् यत् अस्याः परियोजनायाः विषये शीघ्रमेव केन्द्रीयमार्गपरिवहनराजमार्गमन्त्री नितिनगडकरी इत्यनेन सह चर्चा भविष्यति। एतदतिरिक्तं राज्यसर्वकारः हाटुमन्दिरपर्यन्तं रज्जुमार्गं स्थापयितुम् अपि विचारयति, पर्यटकसङ्ख्यां वर्धयितुं हाटुमन्दिरमार्गस्य विस्तारस्य योजनायां कार्यं कुर्वन् अस्ति।

# जम्मूक्षेत्रे आतङ्कवादीनाम् आक्रमणस्य अनन्तरं सुरक्षाबलानि सचेष्टिताणि, हिमाचलप्रदेशस्य सीमासु निरीक्षणं वर्धितम्



**हिमसंस्कृतवार्ताः - कार्यालयीयः प्रतिनिधिः।**

जम्मू-कश्मीरे आतङ्कवादीनां आक्रमणानाम् अनन्तरं हिमाचलप्रदेशस्य चम्बामण्डलस्य सीमासहितेषु अन्येषु क्षेत्रेषु निरीक्षणं वर्धितम् अस्ति।

अम्बालानगरे आतङ्कवादीनां आक्रमणपत्रसम्बद्धानां सर्वेषां तथ्यानां परीक्षणं क्रियते, अस्मिन् विषये आवश्यकसूचनाः च संगृहीताः सन्ति। हिमाचलप्रदेशस्य अन्यराज्यैः सह सीमाः तस्य सीलीकरणं, निरीक्षणं च क्रियते।

## पुलिसबलं विशेषनिरीक्षणं कुर्वन् अस्ति

राज्यस्य पुलिस-गुप्तचर-विभागेन विशेष-निरीक्षणं क्रियते। समीपस्थे राज्ये आतङ्कवादीनां घटनानां अनन्तरं सुरक्षा अधिका सुदृढा अभवत्। राज्यस्य प्रवेशद्वारेषु सीसीटीवी, पुलिसैः च विशेषनिरीक्षणं क्रियते। हिमाचलप्रदेशे विभिन्नेषु स्थानेषु निरीक्षणकेन्द्राणि स्थापितानि सन्ति, पुलिसैः शङ्कितानां विषये दृष्टिः वर्तते। शङ्किताः जनाः राज्ये न प्रविशन्ति इति सर्वाः सावधानताः क्रियन्ते, सर्वे सजगाः सन्ति।

## चतुर्णां आतङ्कवादीनां आक्रमणानां कारणेन सतर्कता वर्धिता

जम्मू-कश्मीरे चतुर्णां आतङ्कवादीनां आक्रमणानां कारणेन देशे व्यग्रता उत्पन्ना। रेसीनगरे आतङ्कवादीनाम् आक्रमणे ९ भक्ताः प्राणान् त्यक्तवन्तः। डोडा-कठुआ-नगरयोः आक्रमणानां कारणेन भारतीयसैनिकाः अपि सजगाः अभवन् । इदानीं हिमाचलप्रदेशस्य सीमासु अपि निरीक्षणं वर्धितम् अस्ति ।

# Himachal Weather : सुन्दरनगरम् १७, भुन्तरं च १२ वर्षाणां परं सर्वाधिकम् ऊष्णम्



**हिमसंस्कृतवार्ताः - शिमला।** हिमाचलप्रदेशे उष्णतायाः कारणेन जनाः व्यथिताः अभवन् । अष्टौ मण्डलानि तापतरङ्गस्य ग्रहणे सन्ति । रविवासरे अपि सिरमौरमण्डलस्य नाहने, मण्डीमण्डलस्य सुन्दरनगरे, सोलने, ऊनायां च तीव्रतापतरङ्गः अभवत्। एतदतिरिक्तं शिमला, भुन्तरं, धर्मशाला, मनाली, बिलासपुरं, हमीरपुरम् इत्यादिषु क्षेत्रेषु अपि तापतरङ्गः अभवत् । रविवासरे कुल्लूमण्डलस्य भुन्तर-नगरस्य तापमानं १० वर्षेषु सर्वाधिकम् आसीत् । अत्र रविवासरे तापमानं ३८.६ आसीत्, यदा तु पूर्वं २०१२ तमे वर्षे ३८.८ आसीत् । परन्तु १९८८ तमे वर्षे मेमासस्य ३१ दिनाङ्के भुन्तरे ४० डिग्री सेल्सियसपर्यन्तं तापमानं प्राप्तवान् आसीत् । रविवासरे मनालीनगरस्य तापमानं ३१.२ डिग्री सेल्सियस आसीत्, यत् २०२२ तमे वर्षे अपि तथैव आसीत् । २००७ तमे वर्षे ३२.०, २००९ तमे वर्षे ३१.३ च आसीत् । तस्य अर्थः अस्ति यत् मनाली-नगरस्य तापमानम् अपि २००९ तमे वर्षस्य अनन्तरं सर्वाधिकं आसीत् । तथैव सुन्दरनगरस्य तापमानं ४१.६ डिग्री सेल्सियस आसीत् । पूर्वं २००७ तमे वर्षे ४२.१ डिग्री सेल्सियस, २०१९ तमे वर्षे ४१.६ डिग्री सेल्सियस च आसीत् । अपरपक्षे ऋतुविज्ञानकेन्द्रशिमला इत्यनेन सोमवासरे हिमाचलप्रदेशस्य अनेकक्षेत्रेषु तीव्रतापतरङ्गस्य नारङ्गवर्णीयसचेतना प्रसारिता अस्ति। हमीरपुरं, ऊना, बिलासपुरं, मण्डी, सिरमौरम् मण्डलेषु केषुचित् क्षेत्रेषु एषा सचेतना निर्गता अस्ति। एतदतिरिक्तं काङ्गड़ा, सोलनं, कुल्लुः, शिमला इत्यादिषु केषुचित् क्षेत्रेषु उष्णवायुः अपि प्रवहति । ऊना, बिलासपुरं, हमीरपुरं, शिमला, सोलनं, काङ्गड़ा, कुल्लूः इत्यत्र अपि तापतरङ्गः अभवत् । शिमलानगरे अपि तीव्रः तापः, तापतरङ्गः च भविष्यति। ऋतुविज्ञानकेन्द्रशिमलानगरस्य अनुसारं रविवासरे ऊनानगरे सर्वाधिकं तापमानं ४४.६ डिग्री सेल्सियसपर्यन्तं जातम्, यत् राज्ये अधिकतमं भवति, देहरागोपीपुरे तु ४४ डिग्री सेल्सियसपर्यन्तं तापमानं प्राप्तम्। कुकुमसेरी-क्षेत्रस्य न्यूनतमं तापमानं ७.२ डिग्री सेल्सियस आसीत् । उल्लेखनीयं यत् पर्वतीयक्षेत्रेषु तापतरङ्गः तदा आरभ्यते यदा तापमानं ३० डिग्री सेल्सियसतः अधिकं भवति, यदा तु समतलक्षेत्रेषु तापतरङ्गः तदा आरभ्यते यदा तापमानं ४० डिग्री सेल्सियसतः अधिकं भवति।

# प्रदेशे जलसंकटं वर्धमानम्, सर्वकारः मौनम् - जयरामठाकुरः

हिमसंस्कृतवार्ताः - कार्यालयीयः प्रतिनिधिः।

विपक्षस्य नेता जयरामठाकुरः अवदत् यत् राज्ये जलापूर्तेः विशालसंकटं प्रति गच्छति। सम्पूर्णे राज्ये जलापूर्तिः प्रभाविता अस्ति। पर्यटनस्य ऋतुः प्रचलति परन्तु सर्वत्र जनाः जलस्य अभावात् समस्यानां सम्मुखीकरणं कुर्वन्ति। अस्य संकटस्य निवारणाय सर्वकारः गम्भीरप्रयत्नान् न करोति। राज्यराजधानीविषये वदन् अधिकांशस्थानेषु चतुःपञ्चदिनेषु जलं प्राप्यते। अनेकस्थानेषु स्थितिः अपि दुर्गता अस्ति। सम्पूर्णस्य राज्यस्य एषा स्थितिः किन्तु सर्वकारः अस्मिन् विषये सर्वथा मौनम् अस्ति, अस्य जलसंकटस्य समाधानार्थं सर्वकारः गम्भीरतापूर्वकं कार्यं न करोति। एतस्याः समस्यायाः निवृत्त्यर्थं सर्वकारेण गम्भीरप्रयत्नाः करणीयाः भविष्यन्ति यतोहि जलं प्रतिक्षणं जनानां आवश्यकता अस्ति।

ग्रीष्मर्तौ जलस्य सेवनं वर्धते इति पूर्वमेव निर्णयः कृतः इति जयरामठाकुरः अवदत्। पर्यटन-ऋतुकारणात् राज्ये बहुसंख्यकाः जनाः आगच्छन्ति, येन होटेलेषु जलस्य उपभोगः अपि वर्धते । ग्रीष्मकाले जलसमस्यायाः निवारणाय विशेषव्यवस्था भवेयुः । परन्तु सर्वकारेण अस्मिन् विषये किमपि गम्भीरता न दर्शिता । अस्याः समस्यायाः निवारणाय योजना न कृता । यस्य परिणामः अग्रे अस्ति। राज्यस्य जनाः जलस्य अभावेन सह संघर्षं कुर्वन्ति।

सः अवदत् यत् राज्ये जल समस्या न भवतु इति सर्वकारेण सुनिश्चितं कर्तव्यम्। एतादृशानां समस्यानां निवारणाय सर्वकारेण पूर्वमेव योजनाः करणीयाः। सम्भाव्यचुनौत्यस्य कृते सर्वकारः सज्जः भवेत्। एवं प्रकारेण राज्यस्य जनाः प्रत्येकं आवश्यकसुविधायाः कृते व्याकुलाः न भवितुम् अर्हन्ति । सर्वकारः स्वदायित्वं निर्वहतु येन सामान्यजनाः एतादृशीनां समस्यानां सम्मुखीभवितुं न प्रवृत्ताः भवेयुः।

# क्षेत्रीयसंस्कृतप्रशिक्षणवर्गस्य समापनसमारोहस्य आयोजनं मुख्यालयस्य दरबारहालमध्ये रविवासरे सम्पादितम्






**हिमसंस्कृतवार्ताः, दरभङ्गा। राघव नाथ झा।** संस्कृतविश्वविद्यालये १२ दिवसीय आवासीय कार्यक्रमस्य अध्यक्षतां वहन् कुलपति प्रो. लक्ष्मीनिवासपाण्डेय महोदयः उक्तवान् यत् "संस्कृतं सर्वेषां" इति संकल्पः तदा एव साकारः भविष्यति यदा समाजस्य प्रत्येकवर्गं प्रति अस्याः भाषायाः प्रचारः भविष्यति। प्रो.पाण्डेय महोदयः प्रशिक्षणवर्गे प्राप्तं ज्ञानं स्वस्वनिवासक्षेत्रे सम्भाषणशिविरेण समाजे शीघ्रं प्रसारयितुं प्रशिक्षकेभ्यः आह्वानं कृतवान्।

उक्तं जानकारीं प्रददन् पीआरओ निशिकान्त महोदयः उक्तवान् यत् समापनकार्यक्रमस्य विधिवत् शुभारम्भः संस्कृतभारत्याः अखिलभारतीयसंगठनमन्त्री दिनेशकामत, पूर्वकुलपति प्रो. देवनारायणझा तथा कुलपति प्रो. लक्ष्मीनिवासपाण्डेय इत्येतैः दीपप्रज्वलनं देवतासु चित्रे पुष्पाञ्जलिं अर्पयित्वा कृतम्। मुख्यातिथिः संगठनमन्त्री श्रीकामत महोदयः उक्तवान् यत् नूतनशिक्षानीतौ संस्कृतायाः विशेषं महत्त्वं प्रदत्तम् अस्ति। अस्माभिः अस्या नीत्याः अध्ययनं कृत्वा बिहारराज्यस्य सर्वेषु विद्यालयेषु प्राथमिकश्रेणितः एव संस्कृताध्ययनस्य प्रोत्साहनं करणीयम्। तेन उक्तं यत् संस्कृतं न केनचित् वर्गविशेषेण सीमिता अस्ति अपितु सा समाजस्य सर्वेषां वर्गाणां भाषा अस्ति। अस्याः उत्थानं परमावश्यकं अस्ति।

विशिष्टातिथिरूपेण केएसडीएसयू पूर्वकुलपति प्रो. देवनारायणझा महोदयः उक्तवान् यत् भारतीयज्ञानपरंपरायाः सर्वे स्त्रोतः संस्कृतभाषायां एव निबद्धाः सन्ति। सर्वाङ्गिणविकासाय अस्माभिः अस्याः भाषायाः अध्ययनं करणीयम्। अस्मिन विश्वविद्यालये आयोजितं प्रशिक्षणवर्गं भविष्ये निश्चयेन फलवती भविष्यति।

आवासीयप्रशिक्षणवर्गस्य संयोजकः डॉ. रामसेवकझा महोदयः उक्तवान् यत् समारोहे प्रशिक्षकैः प्रशिक्षणवर्गे प्राप्तं ज्ञानं अनुभवकथनेन, गीतसङ्गीतादिना, अभिनयेन, नाटकेन च प्रस्तुत्य जनान् संस्कृतपठनाय प्रेरितम्। ज्ञायतां यत् कुल १२६ प्रतिभागिभ्यः बिहारझारखण्डयोः कुल २६ प्रशिक्षकैः गणशः विभक्त्य १२ दिनानि प्रशिक्षणं दत्तम्।

कार्यक्रमे संरक्षकः डॉ. दिनेशझा, सर्वव्यापकप्रमुखः डॉ. उमेशझा, स्वागताध्यक्षः डॉ. घनश्याममिश्र, डॉ. महानन्दठाकुर, कोषसहभोजनव्यवस्थाप्रमुखः डॉ. सुधीरकुमारझा, कुलानुशासकः प्रो. पुरेन्द्रवारिक, कुलसचिवः डॉ. दीनानाथसाह, विकासपदाधिकारीः डॉ. पवनकुमारझा, प्रशिक्षणप्रमुखः डॉ. चन्द्रमाधवसिंह, संगठनमन्त्री श्रवणकुमार, डॉ. संजीतकुमारझा, प्रशिक्षकः डॉ. सुधीरकुमार, डॉ. शशिकान्ततिवारी, विभागसंयोजकः डॉ. त्रिलोकझा, जिलासंयोजकः डॉ. अभयकुमार, डॉ. छविलालन्यौपाने, गोपालकृष्ण, राजकिशोर, डॉ. श्यामकुमारझा, डॉ. रामेश्वरधारिसिंह, डॉ. विभाकरदूबे, डॉ. यदुवीरस्वरूपशास्त्री, डॉ. मुकेशप्रसादनिराला सहित समाजसेविनः राजनीतिक्षेत्रे च प्रमुखाः जनाः उपस्थिताः आसन्। कार्यक्रमस्य संचालनं संस्कृतभारत्याः बिहारस्य प्रशिक्षणप्रमुखः डॉ. देव निरंजन दीक्षित तथा धन्यवादज्ञापनं प्रान्तमन्त्री डॉ. रमेशकुमारझा महोदयः कृतवान्।

सोमवासरे प्रातः भारतमातायाः पूजनानन्तरं सर्वे प्रशिक्षकाः स्वस्वगृहं प्रति प्रस्थानं करिष्यन्ति।

# रणवीरसिंहेन सह कार्यं कर्तुम् इच्छति शर्वरी वाघः



**हिमसंस्कृतवार्ताः- जगदीश डाभी**

बॉलीवुड-अभिनेत्री शर्वरी वाघः अधुना यावत् किमपि चलचित्रं न कृतवती। अधुना शर्वरी स्वस्य चलचित्रस्य 'मुंजा' इत्यस्य कारणेन वार्तायां वर्तते। मुंजा इति भयानकहास्यचलचित्रम् अस्ति। अस्मिन् चलचित्रे शर्वरी च मुख्यभूमिकायाम् अभिनयम् अकरोत्। चलचित्रे तेन सह अभय वर्मा अपि मुख्यभूमिकायाम् अस्ति। अस्मिन् शर्वरी 'बेला' इत्यस्याः भूमिकां निर्वहति। अस्याः भूमिकायाः कृते शरवरी इत्यस्याः बहु प्रशंसा भवति। शरवरी 'बेला' इत्यस्याः भूमिकायाम् अस्ति। इदानीं मुंजायाः बेला अर्थात् शर्वरी वाघः बॉलीवुड-नायक-रणवीरसिंह इत्यनेन सह कार्यं कर्तुं स्वस्य इच्छां प्रकटितवती अस्ति। अद्यैव 'फिल्मीज्ञान' शर्वरी इत्यनेन सह साक्षात्कारं कृतः। एतस्मिन् समये शर्वरी अवदत् यत् सा रणवीरसिंहेन सह कार्यं कर्तुं निश्चितरूपेण इच्छति इति।

# (४१५) मोल्स्वर्थ् शब्दकोशः


Capt. G.M.F Molesworth R.N.

मोल्सवर्थ इत्यनेन संस्कृत, फारसी, फारसी, अरबी इत्यादिभ्यः शब्दाः शब्दावल्यां योजिताः । मराठीभाषायां एतावन्तः शब्दाः न सन्ति । परन्तु रोबर्ट् मनी मोल्स्वर्थ् इत्यस्य प्रशंसाम् अकरोत् । अद्यपर्यन्तं भारते एतत् मुद्रणं सर्वोत्तमम् इति वदन् सः लिखितवान् यत् "छात्रान् विचार्य एतादृशः विशालः शब्दकोशः आवश्यकः आसीत् । शब्दकोशः समृद्धः समीचीनः च अस्ति । अस्य मराठा (मराठी) भाषायाः विशालं ज्ञानम् अस्ति । एतत् पुस्तकं गौरवम् अर्हति" इति । त्रिसदस्यसमित्याः परस्परविरोधिनः मतैः ब्रिटिशसर्वकारः विस्मितः अभवत् । अधुना सः मोल्स्वर्थ् शब्दकोशस्य मूल्याङ्कनार्थं १८ सदस्यानां समितिं नियुक्तवान् । परन्तु समितिः सर्वसम्मत्या मोल्सवर्थस्य कार्यस्य प्रशंसाम् अकरोत् । अधिकांशसदस्यानां मतं यत् यदि अयं शब्दकोशः न स्यात् तर्हि बहवः मराठीशब्दाः यूरोपीयैः कदापि न अवगमिष्यन्ति स्म । तदनन्तरं १८३१ तमे वर्षे सेप्टेम्बरमासे ब्रिटिशसर्वकारेण तस्मै मोल्सवर्थस्य प्रशंसापत्रं प्रेषितम् । मोल्सवर्थ् इत्यनेन इदानीं आङ्ग्ल-मराठी-शब्दकोशः अपि निर्मातव्यः इति ब्रिटिश-सर्वकारेण सूचितम् ,, तस्य व्ययस्य अनुमोदनं च कृतम् ।

मोल्सवर्थः काण्डी इत्यस्य साहाय्येन आङ्ग्ल-मराठी-शब्दकोशस्य कार्यं अपि आरब्धवान् । परन्तु १८३२ तमे वर्षे सः स्वास्थ्यसमस्याभिः पीडितः भवितुम् आरब्धवान् । मराठी-आङ्ग्लशब्दकोषे हठपूर्वकं कार्यं कुर्वन् सः स्वस्वास्थ्यस्य उपेक्षां कृतवान् आसीत् ।

एतावन्तः वर्षाणि जीवनं मराठी-आङ्ग्लशब्दकोशस्य निर्माणे व्यतीतानि। सः अधुना ३७ वर्षीयः आसीत् । सः दक्षिणभारते कतिपयदिनानि यावत् ऊटी-समीपे एव स्थितवान् यतः सः शीतलतरं स्थानं गच्छति चेत् तस्य स्वास्थ्यं सुदृढं भविष्यति । परन्तु तस्य स्वास्थ्यं तस्य समर्थनं न करोति स्म । अनिच्छया सः १८३६ तमे वर्षे इङ्ग्लैण्डदेशं प्रत्यागतवान् ।

१८३६ तः १८५१ पर्यन्तं १५ वर्षाणि यावत् मोल्सवर्थः मराठी-महाराष्ट्र-देशयोः दूरं इङ्ग्लैण्ड-देशे विदेशे निवसति स्म । एतस्मिन्नन्तरे कोशस्य प्रथमसंस्करणं समाप्तम् । अन्यत् संशोधितं संस्करणं निर्मातव्यम् आसीत् । १५ वर्षाणाम् अनन्तरं ब्रिटिशसर्वकारेण मोल्सवर्थ् इत्यनेन द्वितीयं संस्करणं सज्जीकर्तुं भारतम् आगन्तुं अनुरोधः कृतः, मराठीभाषायाः भवतः आवश्यकता अस्ति । तस्य आग्रहस्य अनुसरणं कृत्वा १८५१ तमे वर्षे मोल्सवर्थः भारतं प्रत्यागतवान् । आयुः ५६ वर्षाणि आसीत् । परन्तु स्वास्थ्ये सुधारः अभवत् । उत्तममराठीभाषायां सर्वैः सह उत्साहेन सम्भाषणं कुर्वन्तं दृष्ट्वा जनाः मुखयोः अङ्गुलीः स्थापयन्ति स्म । १८५१ तः १८५७ पर्यन्तं सप्तवर्षं पुनः मोल्सवर्थेन मराठी-आङ्ग्लशब्दकोशाय समर्पितं । पुणे महाबलेश्वरे च स्थित्वा एतत् कार्यं सः अकरोत् । नवसंशोधिते शब्दकोशे अधुना ६०,००० मराठीशब्दाः आसन् । १८५७ तमे वर्षे ९५२ पृष्ठीयः अयं संशोधितः मोल्सवर्थ मराठी आङ्ग्लशब्दकोशः प्रकाशितः । अद्यत्वे वयं यत् संस्करणं पश्यामः तत् एव । अद्यत्वे अधिकांशजनाः जानन्ति यत् अयं शब्दकोशः अमेरिकादेशस्य शिकागोविश्वविद्यालयेन अन्तर्जालमाध्यमेन (अन्वेषणेन सह) उपलभ्यते।

१८६० तमे वर्षे मोल्स्वर्थ् इङ्ग्लैण्डदेशं प्रत्यागतवान् । मोल्सवर्थस्य अनेकाः शास्त्रज्ञाः आसन् ये शब्दकोशस्य कार्ये तस्य साहाय्यं कृतवन्तः । तस्मिन् अलीबौग्, नागांवः च बहु आसन् । ते सर्वे मोल्सवर्थं मोलेसर शास्त्री इति आहूतवन्तः। केचन जनाः मोरेश्वरशास्त्री इत्यस्य विषये अपि एतादृशं टिप्पणं कृतवन्तः । अद्यत्वे अपि महाराष्ट्रे न्यायालयेषु मराठीशब्दस्य व्याख्यानस्य समयः आगच्छति तदा मोल्सवर्थेन दत्ता व्याख्या न्यायाधीशैः मानकरूपेण गृह्णाति। मोल्सवर्थस्य कार्यस्य प्रशंसां कुर्वन् विश्वकोशकारः पं. लक्ष्मणशास्त्री जोशी लिखितवान्, "'मोल्सवर्थः प्रथमः बृहत्-प्रमाणस्य मराठी-शब्दकोशस्य निर्माणं कृतवान् । अस्मिन् शब्दकोशे स्वस्य विशालकार्ये सः अनेकेषां विद्वांसस्य प्रेरणाम् अयच्छत्, तत्र सम्मिलितवान् च । मोल्सवर्थः स्वयमेव अस्याः शब्दकोशस्य कृते एव सम्पूर्णं जीवनं समर्पितवान् । मराठीभाषा महाराष्ट्रं च, मोल्सवर्थः कदापि एतत् ऋणं न विस्मरिष्यति।'

जेम्स् थॉमस मोल्स्वर्थ् इत्यस्य मृत्युः १८७१ तमे वर्षे जुलैमासस्य १३ दिनाङ्के अभवत् ।

**संकलितम् अनुवादितम् सुधासाठ्ये** sudha_sathaye@yahoo.com

हिमसंस्कृतवार्तायै सहयोगं कुर्वन्तु
दैनिकं ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
संस्कृतकार्यमिदम् पुण्यकार्यमिदम्
इदं संस्कृताय न मम

# ।। श्रीरामायणकथा ।।

**उत्तरकाण्डम्! (सप्तविंशः सर्गः)**
**हनुमतः जन्मवृत्तान्तकथनम्।**
**(द्वितीयः खण्डः**

यस्मिन् दिवसे एषः हनुमान् भास्करं ग्रहीतुं प्लुतः तस्मिन्नेव दिवसे राहुः सूर्यं ग्रहीतुम् अगच्छत्। तदानीं सूर्यरथोपरि अनेन हनुमता परामृष्टः चन्द्रार्कमर्दनः राहुः अपक्रान्तः त्रस्तः इन्द्रस्य भवनं गत्वा देवगणैर्वृतं देवं भ्रुकुटीं कृत्वा अब्रवीत् हे देवराज! मम बुभुक्षानिवारणाय चन्द्रार्कौ मह्यं दत्वा किमिदं त्वया इदानीम् अन्यस्य कृते दत्तम्? अद्याहं जिघृक्षुः सूर्यम् आगतः किन्तु अन्यः राहुः सूर्यम् आसाद्य सहसा अजिघृक्षत्। राहोः तद् वचनं श्रुत्वा देवराजः इन्द्रः आसनं हित्वा राहुं पुरःसरं कृत्वा तत्र अगच्छत् यत्र हनुमता सूर्यः गृहीतः। परन्तु राहुः तदा वासवं त्यक्त्वा वेगेन तत् स्थानं प्राप्नोत्। तदानीं बालः हनुमान् राहुं दृष्ट्वा फलं मत्वा सूर्यं समुत्सृज्य तं ग्रहीतुम् उदपतत्। सूर्यम् उत्सृज्य प्रधावन्तं प्लवङ्गमं दृष्ट्वा सन्त्रासात् सः राहुः इन्द्र इन्द्रेति मुहुर्मुहुः अभाषत। राहोः कातरस्वरं श्रुत्वा इन्द्रः तदा भयं नास्ति, अहं तं हनिष्यामि इत्यब्रवीत्।



ततः ऐरावतं दृष्ट्वा मारुतिः एतद् बृहत् फलम् इति विचिन्त्य तम् ऐरावतम् अभ्यद्रवत्। एवं दृष्ट्वा नातिक्रुद्धः शचीपतिः मारुतिं वज्रेण अताडयत्। ततः इन्द्रवज्राभिताडितः वायुपुत्रः गिरौ अपतत्। तेन तस्य वामा हनुः अभज्यत्। तस्मिन् पतिते पवनदेवः इन्द्राय अकुप्यत् सः च प्रजानाम् अहिताय स्वीयं वेगं रुद्ध्वा स्वसुतम् आदाय गुहां प्रविष्टः अभवत्। तस्मात् वायुप्रकोपात् समस्तं त्रैलोक्यं निष्क्रियम् अभवत्। ततः दुःखिताः सगन्धर्वाः सदेवासुरमनुष्याः प्रजाः सुखेच्छया प्रजापतिम् अगच्छन्। ब्रह्मदेवं गत्वा प्राञ्जलयः ते देवाः अब्रुवन् हे भगवन्! त्वया चतुर्विधाः प्रजाः सृष्टाः, त्वया च अस्माकम् आयुषः पतिः पवनः कृतः। सः अस्माकं प्राणेश्वरः भूत्वा सहसा दुःखं जनयन् अन्तःपुरे स्त्रियः इव अस्मान् अरुणद्। तस्मात् वायुना उपहताः वयं त्वां शरणं प्राप्ताः। वायुसंरोधजं दुःखमिदम् अपहर भगवन्! प्रजानां तद् वाक्यं श्रुत्वा ब्रह्मदेवः एतस्य कारणम् अस्ति इत्युक्त्वा पुनः अभाषत हे देवाः! यस्मात् देवराजः इन्द्रः राहोः वचने विश्वासं कृत्वा वायोः पुत्रम् अहन् तस्मात् पवनः कुपितः भूत्वा स्वीयं वेगम् अरुणद्। वायुः अशरीरः भूत्वा शरीरेषु चरति। वायुना सम्परित्यक्तं जगत् सुखं न विन्दति। एवमुक्त्वा प्रजापतिः प्रजाभिः सदेवगन्धर्वभुजङ्गैः सह तत्र अगच्छत् यत्र पवनपुत्रं गृहीत्वा स्थितः आसीत्।



हिमसंस्कृतवार्ता, प्रदीपः
pradipnath997@gmail.com

# अरुणाचलमाहात्म्यम् (उत्तरार्धः)--१०
## दुर्गाकृतमहिषासुरवधः

तावदेव महिषासुरनामा दैत्यः तस्याः विषये कथञ्चित् आकर्णयत्। महिषासुरेण सर्वे लोकाः जिताः आसन् । तेन इन्द्रस्य अपि पराभवः कृतः आसीत्। सिद्धेषु विद्याधरेषु च सः भयम् उत्पादयति स्म। ब्रह्मणः प्राप्तेन वरेण सः अखिलैः अपि शस्त्रास्त्रैः दुर्निग्रहः शापानामपि अगोचरः च जातः आसीत्। दैत्याः नित्यं तस्य सेवां कुर्वन्ति स्म। सः मुनिपत्नीन् दूषयति स्म। धर्मघातकः सः बलेन पुलोमा, नमुचिः वृत्रः एतेभ्यः दैत्येभ्यः अपि अधिकः आसीत्। हिरण्याक्षेण समं सः बलवान् आसीत्।

सः तपस्यन्तीं पार्वतीं विलोभयितुं कांचित् तापसवेषधारिणीं दूतीं प्रेषितवान्। सा दूती आगत्य गिरिजायाः सखीसमक्षं एवमनुचितं वक्तुम् आरेभे–'भवती किमर्थम् अस्मिन् भीषणे घोरे वने निवसति? भवत्यै तु राज्ञः अन्तःपुरगृहे एव वासः युज्यते। केन कारणेन भवत्याः चित्तं भोगविषये निःस्पृहं जातमस्ति येन भवती देवानामपि दुष्करं तपः आचरन्ती अस्ति? मृदुशय्यां विहाय भवती किमर्थं पाषाणप्रस्तरे शयनं करोति? तपोजडः शिवः भवत्या तु पूर्वमेव त्यक्तः अस्ति नु? देवेषु भवत्या अनुरूपः तु कोपि अन्यः न विद्यते। तथापि मम स्वामी महिषः दानवानाम् अधिपतिः त्रैलोक्यनाथश्च अस्ति। यदि भवती तं द्रक्ष्यति तर्हि तत्क्षणमेव तपः त्यक्ष्यति। गुप्तरीत्या भवत्याः विषये सर्वं ज्ञात्वा मम स्वामी कामातुरः भूत्वा भवतीम् आनेतुं मां दूतिकां प्रेषितवान्।

तथापि तस्याः अत्यन्तं विपरीतम् असमञ्जसं वचनं श्रुत्वा देव्याः क्षुब्धां मनःस्थितिं विज्ञाय देवीसखी विजया तां दूतिकां निष्कासितवती। तदा दूत्या रोषेण सत्वरं गत्वा एषः उदन्तः महिषासुराय निवेदितः।

सोपि तत्सर्वमाकर्ण्य अत्यन्तं कोपेन देवीं मारयितुं कोटिदैत्यसैन्यं गृहीत्वा तत्र सम्प्राप्तः। तस्य रथैः गजैः अश्वैः पदातिभिः सर्वाः दिशः व्यापृताः। तेषां क्रीडाभिः वाद्यघोषैश्च नभः स्फुटदिव अभवत् दैत्यानां पादाघातैः वसुन्धरा विदीर्णा इव अभवत्। बाष्कलः दुर्मुखः चण्डः प्रचण्डः ,चामरासुरः, महाहनुः महामौलिः उग्रास्यः विकटेक्षणः ज्वालास्यः दहनः एते तस्य सेनान्यः अपि तस्य सैन्येन सह आगतवन्तः।

एतं नियमविघ्नकारिणं कोलाहलं श्रुत्वा देवी दुर्गां दैत्यसंहाराय आदिष्टवती। सापि अरुणगिरिनिवासिनं सिंहम् आरुह्य विविधैः दिव्यास्त्रैः सह कालिका इव महीं प्राप्ता। सा घोरं सिंहनादं कृतवती। रोषेण स्वाङ्गात् तया योगिनीनां चक्रं मातृकाः अपि सृष्टाः।



तासु काश्चन दण्डधारिण्यः हंसवाहनाः काश्चन त्रिशूलधारिण्यः वृषवाहनाः, काश्चन शिखिवाहनाः दण्डशक्तिधराः, काश्चन शङ्खचक्रधराः गरुडवाहनाः, काश्चन मुसलहलधारिण्यः व्याघ्रवाहनाः, वज्रधराः हस्तिवाहनाः , खड्गखेटकधारिण्यः अश्वारूढाः आसन्। तासाम् असुरसैन्येन सह घोरं युद्धम् अभवत्। योगिनिभिः मुक्तैः बाणैः छिन्नानि असुरमस्तकानि भूमिम् आवृण्वन्। रणक्षेत्रे रक्तस्य सरितः अवहन्। बाणैः, दण्डैः, शूलैः,शक्तिभिः चक्रैः हलैः खड्गैश्च तः योगिन्यः असुरान् संहतवत्यः। ब्राह्मी स्वयम् आगत्य विकरालेन दण्डेन करालनामकं महिषसेनापतिम् अमारयत्। माहेश्वरी त्रिशूलेन दुर्धरस्य मस्तकं कृन्तितवती। कौमारी शक्त्या चिक्षुरस्य मस्तकम् त्रोटितवती। वैष्णवी चक्रेण विकरालस्य, वाराही मुसलेन बाष्कलस्य,ऐन्द्री वज्रेण दुर्मुखस्य , चामुण्डा मण्डलाग्रेण चण्डमुण्डयोः मस्तकानि कर्तितवत्यः। एवमेव प्रचण्डः, चामरः,महामौलिः महाहनुः उग्रास्यः विकटाक्षः ज्वालास्यः दहनः एते सर्वेपि महिषसेनापतयः देव्या मारिताः।

अनन्तरं स्वयं महिषासुरः कालनेमिप्रभृतिभिः दैत्यैः अनुगम्यमानः सङ्ग्रामस्थलं प्राप्तः। तदा रथिनः निषङ्गिणः धनुर्धराः ससैन्यं तत्र प्राप्ताः घोरं सिंहनादं च अकुर्वन्। बाणानां वृष्ट्या तैः सप्तमातृकानां गणः इतस्ततः द्रावितः। ताः सर्वाः दुर्गां शरणं गताः। तैः महिषस्य दुर्जयत्वं दुर्गायै निवेदितम्। अनन्तरं ताः स्तुत्वा दुर्गां प्रसादितवत्यः। तैः उक्तम् ," हे मातः भवती योगनिद्रारूपेण विष्णोः नयने प्रविश्य तं शाययति। मातः भवत्याः अनुज्ञयैव विष्णुः मधुकैटभदैत्यौ मारितवान्। भवत्या एव शुम्भनिशुम्भदैत्यौ हताः। ब्रह्मविष्णुरुद्राणां उत्पत्तिस्थितिलयशक्तयः भवती एव। भवत्या एव यशोदायाः तथा नन्दस्य अपत्यं भूत्वा भवती कंसाद्यसुराणां हननाय कृष्णस्य साह्यम् अवहत्। भवती एव विद्या, महामाया, सरस्वती, लक्ष्मीः, पार्वती इत्यादिभिः रूपैः राजते।

एवं मातृकाभिः स्तुता दुर्गा सन्तुष्टा सति महिषासुरेण सह युद्धं कर्तुं ययौ।

मण्डलाग्रेण तया प्रचण्डः मारितः। भिन्दिपालेन चामरं क्षुरिकया महामौलिं, कर्परेण महाहनुं, कुठारेण उग्रवक्त्रं, शक्त्या विकटचक्षुषं, मुद्गरेण ज्वालामुखं, मुसलेन दहनं सा हतवती। अनन्तरं सा महाघोरं सिंहनादं कुर्वती महिषासुराभिमुखं गतवती। तदा अत्यन्तं क्रुद्धः महिषः तां बाणैः प्रहर्तुम् आरब्धवान्। दुर्गापि प्रज्वलद्भिः बाणैः तस्य बाह्वोः वक्षसि मुखे च प्रहारं विहितवती। तया तस्य धनुः ,सारथिः, रथाश्वाः, ध्वजः च शरैः निर्भिन्नः। तदा पदातिः भूत्वा महिषेण शतघ्नी नाम्नी कालदण्डः इव भासमाना शक्तिः दुर्गामुद्दिश्य मोचिता।

तेन देवेषु हाहाःकारः समुत्पन्नः। मातृदेवतानां मण्डलं पलायनम् आरब्धवत्। तथापि शतघ्न्याः प्रहारं देवी लीलया सोढवती। तदनन्तरं कृपाणं, पाशः,अङ्कुशः,भुशुण्डिः, खड्गः,शङ्कुः,शक्तिः, गदा, तोमरं, फलकं, सृणिः, कुठारः,भिन्दिपालः, पट्टिशं, लगुडं चेत्येतान् बहुविधास्त्रान् महिषं दुर्गां प्रति चिक्षेप। यथा हस्तिनी इक्षुकाण्डान् भिनत्ति तथा हस्तैः तान् सर्वानस्त्रानादाय देवी लीलया बभञ्ज। देव्याः वाहनं सिंहः अपि नखाग्रैः लाङ्गूलेन, दंष्ट्राभिश्च असुरान् विदारयामास।

तदा महिषासुरः क्षणमेकं सिंहरूपं धृत्वा क्षणं पुनः वराहरूपं ततश्च व्याघ्ररूपं गजरूपं वा धृत्वा देवीं योधयामास। क्षणं सः गगनमध्यं प्राप्य, क्षणं महीतलं गत्वा, क्षणं दिक्षु भ्रमन् क्षणमदृश्यतां प्राप्य दुर्गां प्राहरत्। तथापि मातृकागणैः प्रार्थिता देवी सस्मितं त्रिशूलेन महिषासुरं विदारितवती। कण्ठेन घर्घरध्वनिं कुर्वन् सः असुरः भूमिम् अपतत्। तस्य स्कन्धे स्वस्य चरणं संस्थाप्य देवी तस्य मस्तकम् अच्छिनत्। छिन्नं तन्मस्तकं हस्तेन गृहीत्वा देवी नर्तनं कृतवती। असुरस्य हनने जाते देवाः महर्षयः चापि आनन्देन नर्तनं कृतवन्तः।

**श्री अभिजित् तोडकर**
**abhitdkr9@gmail.com**

पहाड़ी गल्लां हिमसंस्कृतवार्ताः

# बर परमेसरा बर



इतनी गर्मी कदी नी देखी,
स्याणे एहड़ा सुणे गलांदे
हाहाकार मचीरी पाणीए री,
धारा वाले लोग कियाँ कम्म चलांदे

बौड़ियाँ नाळू चुरण्ड सब सुकी गए, खड्डा बी पाणीये री छिप्प नज़र नी औंदी
जे पंज सत्त दिन हौर नी वरया,
तां किया टपगी एबकी तौन्दी

धुप्पे पर वरया करदी अग्ग,
बिना बरखा पुहरड़ी गए कच्याळू
मिटिया रा घड़ा बी कुछ नी करया करदा, गर्मियां अग्गे फेल हुई गई मंगीह कने ध्याळू

बत्त नी बरीह तां छल्लियां कियां बाहंगे, नाज नी हूँगा तां पूरा साल क्या खाहंगे
जे बरस्या नियां परमात्मा हुण बी, तां माला जो लई कने किताजो जाहंगे

आदमिएँ रिया चाली हुण चली पया परमात्मा, लाई देणी इस आदमिएँ री अक्कल ठकाणे
अपील दलील कुछ नी चलणी इसरे अग्गे, इसरी ई कोर्ट कचहरी हुणी इसरे ई हुणे ठाणे

जे माहणु नी सुधरेया करदा रहया बुरे कम्म, तां कदी करारे धुप्पे कदी बरखा रे पौणे बम्म
समझदा अप्पूं जो बड्डा मारदा बड़ियां फौन्सां, कर मुकाबला ओ माहणु जे अया हुण तेरे च दम्म



**रवींद्र कुमार शर्मा**
घुमारवीं
जिला बिलासपुर हि प्र



**ॐ नमो भगवते वासुदेवाय**